अंक ६९ सबोधिपटीका

प॰ ५३

सर्वोत्तटी० ॥श्रीगोपीजनवल्लभायनमः॥ ॥प्रवृद्धयत्कृपांभोधिबिंदुरेकोपियंस्फु
रोत्॥मज्जन्न रमाश्चौतपत्तेमतंवंदेअनलप्रभुं॥१॥व्रजपतिनवकेलीभावसर्व
२ स्वरूपः सुललितगतिराधाराधनासक्तचित्तः॥तदुभयपरसलीलानंदसंदोह
पूर्णः स भवतु मम सर्वं विघ्नलेशाः सुवेशः॥२॥यत्कृतं तु यत्कृतेनफलितंस्या
त्स्वमार्गिणः॥तमश्निंतकुमारं च प्रणमाम्येकरूपिणं॥३॥अथप्रथमं श्रीम
दाचार्याणामलौकिकनामानिनिरूपयंतस्तेषांस्वरूपमीहशमलौकिकानं
दरूपमेवेतिस्वीयानां ज्ञापयितुं अलौकिकधर्मगुणं आनंदमात्रस्वरूपं त
त्प्रकृष्यो त्तमं ब्रह्म श्रीमत्प्रभुचरणाःपरममंगलरूपत्वेनस्तुवंति॥प्राकृत रुस्तः
धर्मानाश्रयमिति॥१॥अत्रस्तुतिस्तुस्वीयानामुपरिस्फुरताहशस्वरूपप्राक २

द्धकरणेन महती द्वयोक्तेति ज्ञापनार्थं नन्वयं यन्निर्विघ्नार्थं तत्र कालादीनामपि
विघ्नकर्तृत्वाशक्तेः॥ यतादृशधर्मविशिष्टस्य निगमप्रतिपाद्यत्वनिरूपणादु
र्वकं यद्ब्रह्मलक्षणमुक्तं तदीदृशमेव तदिति ज्ञापितं॥ नन्वन्यैरपि विद्वद्भिरीदृशं
ब्रह्म निगमप्रतिपाद्यत्वेन न कुत्रापि प्रतिपादितं किंतु निर्गुणं निराकारं तत्राह
॥कलिकालेति॥२॥ ननु कलिकालकृतमेवैतदृशज्ञानं तेषां तदन्ययुगेषु सर्वेषा
मेवं ज्ञानं न भविष्यत्येव धर्मरूपत्वात्तदपि नैतावत्पर्यंतं श्रुतं तर्हि भवदुक्तं क
थं प्रमाणमिति चेत्तत्रोच्यते॥ भगवता पूर्वमपि लीलायुगे विशिष्टमीदृशा
मानंदमात्रकरपादमुखोदरादिरूपं स्वस्वरूपं कलिकालादावेव प्रकटीकृ
तं न कृतादियुगेषु तत्र साधनानामेव मुख्यत्वात्तत्साध्यफलस्य पुरुषोत्तम

नवौ०टी० विभूतित्वात्तत्रपुरुषोत्तमस्यफलत्वात्तस्यसाधनासाध्यत्वादित्यनुपपत्तेः॥
यद्यपिमुक्त्यादिफलंतत्रभवतितदप्योदयेस्थानंनमेवेति॥तदास्वलीलास
२ मयेसाक्षात्स्वरूपबलेनैवस्वीयेषुसर्वस्वमाहात्म्यंप्रकटीकृतंनसाधनैरतत्त
स्यकेवलंस्वप्रमेयबलसाध्यत्वात्तदातत्याकथ्याभावात्तेषुकेषामपिनतज्ज्ञा
नं॥सर्वेषांमर्यादामार्गोक्तिसाधनेष्वेवप्रवृत्तत्वात्॥पश्चान्निजंमाहात्म्यंस
र्वस्वप्रादुर्भावसमयेपुनःकृतौसर्वाविषयमम्भूतं॥तेनप्रादुर्भावसमयेए
वतज्ज्ञानंजातंनान्यदेतिसूचितं॥ततश्चारभ्यविदुषामपिमर्यादामार्गोक्तिसंपू
र्णज्ञानिनामपिकलिकालांधकाराच्छन्नदृष्टित्वात्तेषांपूर्वसाधितज्ञानस्या कृष्णः
पिगतत्वात्संप्रत्येतावत्पर्यंतंतस्यपुष्टिरूपस्यतन्माहात्म्यंनुविसर्वाविष २

यमन्वहिति॥ब्रुवीतिपदेनत्वमिस्तुभक्त्यासर्वदाप्राकट्यसमयेतच्चरणसंबंधा
त्मसरसातिष्ठतिअधुनातदभावात्तस्याऽपिमहद्दुःखंसूचितं॥अतएवाचा
र्यप्राकट्येतद्दुःखस्यानिवृत्तत्वाद्भूमिभागमपिमित्यग्रेवक्ष्यति॥एवंसतियद्देवावि
र्भविष्यत्वेवतज्ज्ञानंतत्रापिरूपातिशयेननतद्व्यतिरेकेणेतिभावः॥ननुसर्वे
षामज्ञानंभवतामिदानींकथंज्ञानंतत्राहुः॥दययानिजमाहात्म्यमिति॥३॥
प्रथमंस्वेच्छयैवास्मद्विषयिणीदयाजातातयैवतत्सर्वोक्तंपुष्टिलीलागुण
विशिष्टंनिजमाहात्म्यंवाएषावाणीकथनद्वाराअस्यास्तुप्रकटीकरिष्यस्त
त्स्वरूपानंदमेवदास्यतीत्युर्यदाऽत्रतदामाहात्म्यरूपोत्तमःस्वस्वलीलार
सविशिष्टंआत्मस्वंचागाधिष्ठानरूपंअलौकिकानंदमयाऽग्निरूपंश्रीमदाचा

यत्स्वरूपं प्रकटं च कारायतः सर्वज्ञः स्वहृत्तां हरिः ॥ एतेनाचार्यस्वरूपबलेनैव त
दुक्तार्थज्ञाने ईदृशीलालसविशिष्टमेव ब्रजजनानां दितिसर्वमाहात्म्यज्ञानमस्मा

कं जातमिति भावः ॥ ननु युष्माकं ज्ञानं जातमेव पुनस्तन्नामकथने को दोषस्तत्रा
ह ॥ तदुक्तमपि दुर्बोधमिति ॥ ४ ॥ अस्माकं ज्ञानेपि तदुक्तं सर्वेषां स्वीयानां यथात
स्याद्भावसमयेपि सुबोधं भवेत् तदर्थं नित्यं प्रवक्ष्यामि ॥ कथने प्रकर्षेण यादृशा
मेव स्वरूपं तादृशमेवैतत्स्वरूपकथने ज्ञातं भवतीति तज्ज्ञानेन तदुक्तं सुबोधि
न्यादि किं सुबोधं भवेदित्युक्त्या स्वरूपमपि तदुक्तरसभावात्मकमेवेति भावः स्व
यंते ॥ ननु सुबोधं भवतीति कथं ज्ञायते प्रतिबंधकस्य विद्यमानत्वात्तत्राह ॥ कृष्णः
म्रविलाघहत ॥ एतेन यथा स्वरूपं प्रतिबंधनिवर्त्तकं फलदायकं तथेदमपि

श्रवणपाठेनतत्रनामोक्तधर्मविशिष्टाचार्यस्वरूपज्ञानेनतदुक्ते सम्यक्ज्ञाते
सतिसाक्षात्फलदायकंनविष्यत्येतिभावःसूचितः॥ ननुकथनप्रयोजनंफल
सहितंभवतोक्तंपरंतुएतद्दृष्टाकःकस्याधिष्ठातायेनफलंदातुंशक्नोतीतितत्रा
ह॥ ऋषिरग्निकुमारस्त्विति॥ ५॥ अग्निकुमारस्यऋषित्वस्यायंभावः॥ यथापू
र्वमग्निकुमारैःकात्यायनिमहाभागइतिसर्वज्ञातःपुष्टिमार्गीयोमंत्रःप्रकटितः
तद्रूपेणशीघ्रंफलमपिप्राप्तंतथाधुनाअग्निकुमारस्वरूपस्यात्मनैवस्वात्मने
वप्रभुणापुष्टिमार्गीयमंत्ररूपमिदंस्तोत्रंप्रकटीकृतं॥ यथातन्मंत्रस्तैरेवप्र
कटितस्तैरेवतत्फलमपितदैवानुभूतंतथाधुनातद्रूपैःश्रीमत्प्रभुभिरेवप्रक
टितमेतैरेवानुभूतमपि॥ किंच॥ यथाव्रजजनेनित्यंतास्तद्भावेनतदात्मकत

सर्वो०टी०

८ यातच्छीलानुरंजितं भगवंतं साक्षात् मिलितमिलितमिव मन्यमाना जाता इत्यवांतर
फलमभूत्तेषां पश्चात्पुनः प्रसन्नो भूत्वा व्रतपसक्तत्रैवागत्य वस्त्रादिहरणेन पु
नस्तद्दानेन स्वकरस्पर्शादिजनितसंबंधानुभवरूपं परमफलं दत्तवांस्ततो मये
मां रंस्यथेति वरदानेन साक्षात्संबंधरूपं संपूर्णं फलमग्रे रासानुभवयोग्यसमये
दत्तवान् ॥ तथाऽधुनाप्यलद्दाग्निकुमाराणामपि यथायथाऽचार्यस्वरूपमनुभू
तं भवति तथा तथा तन्नामनिरूपणे तन्नामार्थविचारे ताद्दशोत्कटभावेन तदा
त्मकतया तच्छीलाविशिष्टाचार्यस्वरूपानुभवरूपं तद्रूपमेवावांतरफलमभू
त्ततः साक्षात्संबंधरूपं फलमनन्नभूदत एवैतत्स्तोत्ररूपमंत्रजपानंतरं प्रसि रूल:
द्धवत्कारेण कुल्लाधरामृतास्वादसिद्धिः फलं वक्ष्यंतीत्येतत्सर्वमग्निकुमार ८

स्पष्टःषित्वनिरूपणेनज्ञापितंभवति॥ अतएवाग्रेफलकथनानंतरंअग्रेनसंज्ञा
यइतिस्यानुभूतत्वेनैवोक्तं॥ ऋषिंनिरूप्यछंदआह॥ नाम्नांछंदस्तुजगती
जगतीछंदोनाम। असावितितदुक्तमपिडबोधमित्युपक्रमादारभ्यइत्यानंद
निधेःप्रोक्तमित्यंतंयत्छंदस्तदसौजगती। तदुक्तंसंतुष्टादशाक्षरंजगतीछंद
इतिपिंगलव्याख्याता। तत्संख्ययातदुक्तमपीत्युपक्रमादित्यानंदनिधेःप्रोक्त
मित्यंतंतत्पूर्णंभवति। ननुयद्दिग्निकुमारोक्तपुष्टिमार्गीयतन्मंत्ररूपत्वमेवै
तत्स्तोत्रस्यतदातन्मंत्रएवाधुनापिकथंनोपदिष्टः किमेतस्यकथनेप्रयोज
नमितिचेत्तत्राह॥ श्रीकृष्णास्यंदेवतांचेति। अयंभावः। पूर्वंभगवान्स्वयं
निरोधंकृत्वापिफलंकात्यायनीद्वारादत्तवानितितदातन्मंत्रेणतत्स्वरूप

नवैष्णटी० ज्ञानात्तेषांफलमभूत्।अधुनास्यएवभगवान्श्रीकृष्णास्यरूपाचार्यद्वारापुष्टि
मार्गंप्रकटीकृत्यफलंदातुमिच्छतितत्पुष्टिमार्गाधिष्ठातृरूपाचार्यस्वरूपज्ञानं
५ विनानभवति।अतएवतत्स्तोत्रेश्रीकृष्णास्यस्यैवदेवतात्वेननिरूपणेनतदधिष्ठा
तृस्वरूपज्ञानात्तत्पूर्वैःकिंफलंभवतीतिमंत्ररूपत्वेनास्पष्टयुपदेशः।तन्मंत्रे
णचैतत्स्वरूपज्ञानाभावात्फलंनसिध्येदित्यनुपदेशश्चेतिपूर्वपक्षानवसरः।
अस्यबीजादिकंस्पष्टमेव।विनियोगोभक्तियोगप्रतिबंधविनाशने।।कृष्णाध
रामृतास्वादसिद्धिरत्रनसंशयः।।१।।अतःपरंयथायथाश्रीमहाचार्यनामा
निस्वयमनुभूतानितथातथानिरूपयंति।।आनंदःपरमानंदःश्रीकृष्णास्यं कृष्ण:
कृपानिधिः।।दैवोद्धारप्रयत्नात्मास्मृतिमात्रार्त्तिनाशनः।।१।।अत्रप्रथमंश्रा ५

कृतधर्मानाश्रयेत्युक्तंधर्मविशिष्टश्रीमदाचार्यस्वरूपदर्शनात्केवलानंदस्वरू
पानुभवानंदइत्युक्तंपश्चात्तद्दययेतिश्लोकेस्वस्यतत्क्रमदानार्थमेवलीलावि
शिष्टस्वरूपोत्तमास्यप्राकट्यस्योक्तत्वेनलीलाविशिष्टानंदानुभवात्परमानं
दइत्युक्तं।परमउत्कृष्टोयश्चानंदस्तद्रूपः।परस्मिन्नमानांलक्ष्मीणामानंदोये
नतद्रूपोवा।ननुयेनलक्ष्म्यानंदोपिपरस्मिन्भवतिसचानंदःकीदृशस्तस्य
चतद्रूपत्वंकथंज्ञायतेतत्राहुः।।श्रीकृष्णास्यश्रीयुक्तकमलपदेनभक्तसहि
तलीलारसविविधगद्गदभाववत्त्वमुच्यते।।तेनयथालीलायांउच्छलितविविध
रसभावाब्धिकल्पितपरमप्रेमास्पदश्रीमत्प्राणप्रियाप्रवृत्तांगसंगपरमानंद
सुधाब्धिपूरणांतरणोद्भवदनिर्वचनीययत्किंचिदद्भुतरसुस्मिताभरणांतिम

सर्वो०टी०

६ 

नोहरं श्रीकृष्णाख्यं भवतीत्यनेन स एवानंदो ऽन्वयोमित॥ श्रीमदाचार्याणां तु तादृशा
स्वरूपत्वेन तादृग्रासकर्तृधर्मप्रभृमामाहितं स्वरूपं स्वस्यानुभूतं भवतीति पूर्वं परमा
नंद इत्युक्त्वा अग्रे तज्ज्ञापकं श्रीकृष्णाख्यमिति नामोक्तमेतेन तद्रूपत्वमपि बोधितम्
॥ यद्वा प्राकृतधर्मानाश्रयमिति॥ अत्रैवं प्रतिभाति॥ आदौ आनंदः परमानंदः
मध्ये रासस्थीभावपूरितविग्रहः तल्लीलाप्रेमपूरितः अंते चैत्यानंदनिधिः प्रोक्तमि
त्यादि वक्ष्यमाणनामभिः श्रीमदाचार्याणां केवलरसात्मकभावस्वरूपत्वं निरूपि
तं॥ स भावस्तु भगवत्स्वरूपात्मक एवेति तादृशा एव मंगलाष्टके उक्त इति तथा नि
रूप्यते॥ प्राकृतेति॥ साक्षात्पुरुषोत्तमस्वरूपं तु द्विधा लोकवेदप्रसिद्धं तद्दती रूक्षः
तं च॥ तत्र सर्वस्यात्मारामत्वव्यापकत्वादयो धर्माः प्रकृतिरन्यादिकृतिः॥ द्विती

६

यस्परमात्मकधर्मोऽस्वप्रकृतिरन्यव्यापकत्वादयो विकृतिः॥ एवं सति प्राकृतधर्मा
व्यापकत्वादयस्तेषामनाश्रयं तद्रहितमित्यर्थः॥ तथा सति निर्धर्मकत्वमाशंक्य
परिहरंति॥ अप्राकृतेति॥ रसात्मका लौकिक निखिलधर्मरूपमिति भावः॥ एवं
निरूपणेन प्रमाणं निगमप्रतिपाद्यमिति॥ नितरां गमयति भगवंतं प्रापयतीति ता
दृशो वेदात्मको वेणुः तेन प्रतिपाद्यं वदोपीडेति श्लोके कलेवराद्यधर्मरूपत्वेन
विहृतं॥ अतएव स्वरूपं केवलरसात्मकभावरूपं नाट्यधारायद्दंतरनुभूतं तदे
यद्वहिरनुभावार्थं हि स्यात् प्रकटं प्राकृतिष्वाजातं स्वभावानुरूपाकारसंवि
तमाविर्भूतमित्यर्थः॥ तादृशमपि महद्ग्विपर्यीभूतमिति परमानंद भरेणास्तो
मीत्युक्तं एवं सति निःप्रत्यूहं स्तोत्रनिरूपणमपि जातमिति भावः॥ ननु ईदृग्विध

सर्वो०टी०
मेतावत्पर्यंतंनकेनापिनिरूपितंतत्राह॥ कलिकालेति॥ एवमनिरूपणे हेतुरुक्त
ःतर्हिभवतांकथंज्ञानंजातमितिचेत्तत्राह॥ दययेति॥ यद्यपीदानींतन्माहात्म्यंमा
७ दृशामपिनज्ञानविषयंतथापिप्रभोःसहजकारुणिकत्वेनमयिदयाजातातया
कृत्वानिजंयत्तत्स्वात्मकीयंमाहात्म्यंपुष्टिपुष्टिमार्गीयंवह्निपीडोक्तवाक्यार्थरूपं
वाप्यपाप्तास्याद्याधिदैविकरसात्मकानंदरूपयाप्रकटीकरिष्यतिः॥ यथावे
णुधारास्वभोगयोग्यास्तुतथानामात्मकस्वीयैवतत्प्रकटीकरिष्यत्याधिदैवि
कदेवताप्रेरणाभावेसासकार्यकरणाक्षमाननैवेदितिसासंप्राकट्येतिंचका
र॥ यथास्वास्यारविंदोद्गतवेणुनादामृतंस्वप्रवेशमात्रेणसर्वेषांप्राकृतध कृष्ण॥
र्मनिवृत्तिपूर्वकंभगवदीयत्वंसंपाद्यस्वास्यात्स्वरूपानुभवंनाहएवचका ७

र ॥ तथा साक्षान्निजात्मस्वरूपश्रीमदाचार्योक्तिवाक्यामृतादरात्सुधारूपैव समाप्यपर्य
संयुक्तैवेति पूर्वं सा स्वप्रवेशमात्रेण संघातप्राकृतधर्मनिवृत्त्या सर्वेषां भगवदी
यत्वं संपाद्य वदर्थपिंडीकृतवाक्यार्थरूपस्वरूपानुभवमपि कारयतीति भावः ॥ अत
एवं अंगीकृत्यैवेति नामोक्तं ॥ एतत्सर्वं गावश्च कृष्णमुखेत्यत्र स्पष्टं मंगतवं ॥ अत
एव स्वानुभवद्योतकत्वेन स्वं वंशे स्थापितमिति नामोक्तं ॥ अत्र मयीति पदं कं वोक्तं
यद्यपि न तथापि अन्यार्थमीदृग्विधप्राकट्यं न संभवतीति मध्याहारकरणं यु
क्तमेव ॥ न च दैवोद्धारप्रयत्नात्मेति नामोक्त्या सर्वेषामेवार्थे समाहात्म्यप्राक
ट्यं कृतमिति वाच्यं ॥ एवमुक्ते सर्वेषामेतत्स्वरूपज्ञानं सर्वेषां मंत्ररूपतन्नामह
त्त्वं स्यात् न त्वेकस्यैवाग्निकुमारस्येत्यन्यथानुपपत्त्याग्निस्ववंशे स्थापितात्र।

सर्वे॰टी॰ षेत्युपपत्त्याश्च तथाकृत इति सर्वमुपपन्नं ॥ एवं स्वस्य तज्ज्ञानप्रकारः उक्तः ॥ अन्येषां
स्वकीयानां केषांचिद्भगवतां कृतपुण्यपुंजानां तद्दर्शकानां स्वायां तत्कथं भवेदिति तत्सा
८ धनमाह ॥ तदुक्तमपीति ॥ यथापूर्वं तत्कूजितश्रवणेन वर्णनेक्रियमाणेन तत्क
रणे स्वसमर्था जाताः ॥ पश्चात्स्वगुणसाक्षात्संबंधिनः स्वस्वरूपं ज्ञापितेन तदनुभवे
संपन्ने वर्णनं भवतु तत्तथा तदुक्तं सुधारूपमपि दुर्बोधं न स्वतो ज्ञातुं शक्यं तज्ज्ञापि
तमेव ज्ञातं भवेदिति ॥ यथा सुबोधं भवेत् तथा तन्नामाष्टोत्तरशतं वक्ष्यामि तत्रा
पि प्रकर्षेण यथा स्वरूपानुभवो भवति ॥ एतेन एतन्नामार्थविचारे श्रीमदाचार्य
स्वरूपज्ञानेन तत्स्वरूपस्य श्रीभागवतप्रतिपाद्यभावरूपत्वात् तदुक्तं सर्वं सुबो कृष्ण:
धं भविष्यतीति सूचितं ॥ ननु प्रतिबंधके प्रसक्ते कथं तदनुभवो भविष्यतीति ८

तत्राङ्कः॥ अखिलाघहृद्दिति॥ अविद्यानिवृत्त्या प्रपंचविस्मृतिपूर्वकं भगवद्दासत्वं।
भगवदीयत्वं संपाद्य स्वरूपानुभवं कारयतीति भावः॥ यद्वाहरिस्त्याहीनां॥ अग्रे
पुनः फलदशायां साक्षात्स्वरूपसुधासंबंधो भविष्यति॥ इदानीं तदधिकारसं
पत्त्यर्थमंतरेव तदुक्तसुधासंबंधेन तदनुभव इति सुष्टूक्तं तया॥ एतदेवोक्तं वद
पडिति श्लोकविवरणं ते अयं पुनरीति॥ अत एवैतत्सर्वाभिप्रायद्योतकमेवाग्रे
ऋषिदेवताबीजादिकं निरूपयंति॥ तत्र प्रथमेतन्नाम्नां मंत्ररूपत्वादग्निकुमारा
णामेतद्दृष्टत्वात्तेषामेव ऋषित्वं निरूपयंति॥ ऋषिरग्निकुमारास्त्विति॥ अत्राग्नि
कुमारपदेन स्वस्वरूपमपि ज्ञापितं॥ नहि अग्नेरुत्पन्नः दृश्यत्वेन दृष्टोप्यग्नि
र्न भवतीति॥ न च जले तद्रूपत्वाऽदर्शनान्नैवमिति वाच्यं॥ कार्यकारणयोरेक

सर्वो०टी० जातीयत्वनियमात् ॥ अन्यथा रसेनतायासंभवः स्यात् ॥ अनन्तजलस्यापि रसरूपता
दृष्टेः रसात्मकत्वं स्मर्यते ॥ रसात्मकानंदमयाग्निरूपत्वं निरूपितं ॥ अत एव कस्यानंदैक
२५ स्वरूपात्वसंबंधिभूयदर्शनत्वकृष्णसेवारमाग्निरित्युक्तं ॥ तत्रापि तापरूपोग्निरस्त्येवे
तिदीपाग्निदृष्टांतो युक्तः स्वप्नेताद्दृशो स्वरूपेकस्पविदन्यथाबुद्धिभ्रमेत्सभ्रांत एवेति
भावः ॥ अग्नेर्दृष्टप्रापकत्वेन जगती छंदः प्रशस्तमिति तदेवोक्तं ॥ सुबोधिन्यादुक्त
भावात्मकत्वेन साक्षात्फलरूपत्वात् तन्नदास्यमेवं देवता क्रान्तत्वेन त्वप्रसादेन फलां
तरं भविष्यतीति ॥ एतद्देवोक्तमस्त्वेवं तात्फलमिति ॥ परमकाष्ठापन्नमहाफला
दित्संयेवं कृतवानिति महाकारुणिकत्वसर्वकरणासमर्थत्वधर्मसहितः प्रभु कृष्णः
बीजं निरूपितं ॥ अतएव विनियोगोपि सा साक्षाद्भक्तिहृदय मुखारविंद संयोगेये — २५

प्रतिबंधकाः सकलेंद्रियनिष्ठप्राकृतधर्मास्तियां विना ज्ञाने प्रोक्ताः॥ एवंसतिह्यर्वं
श्रीमहाचार्यस्वरूपं तदुक्ताज्ञाननिवृत्तौ विनियोगस्तज्ज्ञाने जाते सकलेंद्रियप्रा
कृतधर्मविनाज्ञाने विनियोगः॥ पश्चात्तदुक्तमहार्थानामेतन्नाम्नां स्वरूपला
भमेयोः सुधारूपलालस्यैकं तत्रत्यानेनांतः साक्षात्स्वरूपप्राकट्यैकफलं सिद्धमि
त्यग्रे कृष्णाधरामृतनाम्नाहसिद्धिरेव फलं निरूपितं॥ अत एव अत्रेति पदमुक्तं
नत्वस्येति प्रभुहृदयविजृंभितमवगतं भवतीति सर्वमवदातं॥ अतः परं यथा
नुभवं नामानि निरूपयंति॥ तत्रानंदः परमानंदः श्रीकृष्णास्यमित्येतन्नामत्र
यस्य पुरः स्फूर्तिकार्यैः पूर्वं निरूपितः॥ इदानीं भावांतरेणापि तद्रूपमुच्यते॥
यद्वा॥ श्रीमद्वृंदावनेंद्रप्रकटितेति श्लोकोक्तरूपाणां श्रीमहाचार्याणां न

ममस्वरूपविचारेव्रजरत्नात्मकसीमंतिनीमनोरथपूरणार्थंप्रकटितकोटिकंदर्पाधि
कलावण्यैकधुरसात्मकत्वात्स्वाच्छ्रीमद्भगवत्स्वरूपानंदरूपत्वेनानुभवादानंदएव

नामोक्तं।।अनेनमंत्रेणोक्तानंदनंदरूपत्वमुक्तं।।अग्रेविप्रयोगदशायांभगवति
तादृशस्वरूपेणांतःप्रविष्टेसतितासामतिप्रचुरभावेनांतःसाक्षाल्लीलासहिते
प्रकटेसतिस्वामिनीनांपूर्वतोप्यपूर्वतरकोटिगुणिताधिकपरमानंदानुभवात्स्त्री
मद्भावार्याणांस्फूर्जद्रासादिलीलामृतेतदुक्तरूपस्वामिनीभावरूपत्वेनपरमानं
दानुभवात्परमानंदइत्युक्तं।अतएवजलधिभराक्रांतसर्वरूपत्वमुक्तं।।विप्रयो
गएवचतथात्वात्।एवंसत्याविर्भूतसाक्षात्स्वरूपानंदादंतस्ततोपिकोटिगु कल्ल:
णिताधिकलावण्यरूपप्राकट्येनकोटिगुणितपरमानंदानुभवाद्यंतरंतु

परं फलमित्युक्तं श्रीमदाचार्यचरणैः॥ अत एव भ्रमरगीते आविर्भूतेन सद्वियो
गस्तु हितकारीत्युक्तं। अतः कोटिगुणाधिक परमानंदरूपे रासे संप्रयुक्तत्वात्। ए
कवार प्राकट्ये ईदृग्भावः पुनरीदृग्विध प्राकट्ये तदनंतरं तद्वियोगेन सर्वदा हृदय
वस्थापादितमित्युक्तं॥ तादृग्तापविप्रयोगतापस्यात्मनिष्ठत्वात्। एतेन उभयरसा
त्मकस्वरूपत्वमुक्तं॥ नन्वेतादृशस्वरूपं कथं ज्ञातं भवति तत्राहुः॥ श्रीकृष्णास्यमि
ति॥ यदा संयोगरसात्मकमास्यं भवति तदा तादृशानंदरूपत्वं श्रीमदाचार्याणां
स्फुटमेव ज्ञातं भवति। यदा विप्रयोगरसात्मकं भवति तदा तत्तादृशपरमा
नंदानुभवात् बहिस्तदनुरूप चेष्टया परमानंदरूपत्वमिति तथा भवति॥ किं
च॥ स्फुरदिति तत्र आक्रांतेः उभयात्मकत्वात् सर्वदा परमानंदरूपत्वमेवास्य।

सर्वो॰टी॰ र्याणां यद्यपि तथापि सर्वदांतःप्राकट्ये अंतरेव च संयोगे संयोगलीलाप्यनिर्वचनीया
ऽपूर्व तिरकोटिगुणिताधिकपरमानंदरूपैवाऽनुभूता भवति अतोपि परमानंदरू
२२ पत्वंमितितथानामोक्तमिति भावः ॥ श्रीमदाचार्यचरणैरप्युर्मेधनमरूपं ॥ अन
र्घ्यभावरत्नानि प्राप्यंते तेन तद्धिरं ॥ १ ॥ अत एवैतादृशस्वरूपज्ञानपूर्वकं तदेक
मनसाजपकरणस्य फलं श्रीकृष्णाश्रयेप्युक्तं ॥ आसक्तिभ्रमरन्यायेन यथा भ्र
मरध्यानेन भ्रमभ्रमरीत्वं यथा पुनर्मधुपानादिकं करोति तथायं तदास्यरूपध्याने
नैतादृशरसात्मकीभूय पुनर्रसपानं करोतीति भावः ॥ अन्यथाचार्याणां तन्निमि
रूपत्वाभावे तन्नाम्नां तद्दानसामर्थ्यमपि न भवेदिति ॥ एवं सति ईदृशस्वरूपपरमा कृष्णः
नंदस्वरूपज्ञापनार्थमेवोक्तं श्रीकृष्णस्यमिति ॥ ननु एतादृशामलौकिकम
२२

तिष्ठर्ल्लन मन्येषां मनसापिध्यातुमशक्यं तद्भवता कथं ज्ञेयमनुभूतं च कथं वा तेज्ञा
पितमनुभवितं च तत्राह ॥ कृपानिधिः । अनिर्वचनीयनिरवधिकृपासमुद्रः । अ
यमाशयः । अपारत्नलनिधिः समुद्रः । तत्रागाधे ये केचिन्मज्जंति ते रेव यत्किंचिदपि
भगवदिच्छया रत्नं प्राप्यते न सर्वैः ॥ तथात्रापि तच्चरणागतैस्तत्कृपयाज्ञापनेन
तत्स्वरूपमस्माभिरेव ज्ञायतेऽनुभूयते च नान्यैरिति स्वज्ञानेहेतुरुक्तः । किंचासमनु
प्राकृतसमुद्रः अयमलौकिकः । तत्र भगवदिच्छया दृष्टाऽदृष्टादृश्यो नियामकाः
स्वयमतंत्रः हीनो ॥ अयं तु स्वयमेव सर्वनियामकः ॥ स्वतंत्रः समुद्ररूपः तेन यः क
श्चिच्चरणागतो भवेत्तं कृपया दृष्टात्येव किंचित् ॥ परं तु तादृशाप्रकारकस्व
रूपानुभवरूपनिधिस्तु स्वात्मन एव दत्तो नान्यस्मै इति ज्ञापनायोक्तं कृपा

सर्वो॰टी॰ यानिधिरिति॥इदंतुतदनुभवजनितसंतोषाज्जावचोद्रेकमित्यनुमीयते॥एवंता
दृशदुर्लभतमनिधिदानेनातिश्लाघितरूपासमुद्रत्वंसूचितं॥ननुभवतांतुतादृशा
२२ दुर्लभतममपिदत्तमन्येभ्योपिकिंचिदपिदीयतेवानवातत्राह॥दैवेति॥दैवानां
उद्धारेयानिप्रयत्नानितत्स्वरूपः॥अत्रेदंप्रतिभाति॥दैवानांअंगीकारस्तुमर्या
दापुष्टिभेदेनद्विधा॥येमर्यादायामंगीकृतास्तेषांमर्यादामार्गोक्तसाधनहीना
ना।भगवत्स्वबलेनैवसर्वसाधनानिसंपाद्यतेषांयथाफलंभवेत्तत्प्रयत्नस्वरूपः॥अ
तएवाग्रेवक्ष्यंति॥स्वदासार्थकृताशेषसाधन इति॥स्वस्यैवतत्करणमिति।
तेनैतच्छरणागमनेकृपयातत्करणेतेषांशीघ्रंफलंभवेत्नान्यथेतितदेवक कृत्यः
तव्यंनान्यत्तेनैवसाक्षाद्वारसिद्धस्तत्रैवसाधनानांसिद्धत्वाद्येतिभावः॥येपुष्टौ २२

गीकृतास्तेषामुद्धारस्तु साक्षाद्भगवत्संबंधरूपस्तत्रयेष्वयत्नरूपालीलारससंबं
धेन उत्कृष्टभावाः सर्वात्मभावादयस्तदात्मकस्तत्स्वरूपः। एतेन पुष्टिमार्गीयाणा
मपि एतच्छरणागमनेनैव तदीयकृपया माहात्म्यभावो देयेतत्फलं भवति नान्यसा
धनैरित्येतद्भयार्थमस्य वर्णनामोक्तं देवोद्धारेति॥ तद्भक्तं प्रयोगवेषेऽतिवक्ष्यमा
णके॥ यद्वा॥ मर्यादामार्गे मुक्तिरेव फलं नान्यत्॥ अंगीकृतेष्वाचार्यांगीकृतानां म
र्यादामार्गीयाणां पुष्टिफलं भवति। तद्यथा॥ पूर्वं मर्यादामार्गीयजीवाः स्वमार्ग
फलरूपे ब्रह्मानंदमनुभूय भगवति सायुज्यं प्राप्नुवंति पुनश्चैतान्पुष्टिफलं
दातुमिच्छति तदा ब्रह्मानंदादुद्धृत्य भजनानंदमनुभावयति प्रभुः सन्तु एतच्छ
रणागमनेनैतत्कृपयैव भवति नान्यथेत्यपि ज्ञापितमेतन्नाम्ना॥ एवं सति प

दसंबंधस्तु । दैवानामुद्धारः साक्षाद्ब्रह्मानंदसमुद्भातस्य प्रयत्नेप्यंतःकरणं यस्ये
ति ॥ यथा दैवानां पुष्टिमार्गीयफलं भवति तत्प्रयत्नवान्निरंतरं प्रयत्नशीलः ।
२३ अनेन भगवतस्तु मर्यादायामेवांगीकारोभिप्रेतस्तथापि केवलपुष्टिमार्गप्रव
र्तकत्वेन तदधिष्ठातृत्वेन च श्रीमहाचार्याणां तदंगीकृते कृपया भगवानपि त
त्फलं ददातीय तस्तेषु स्वप्रकटितत्वेन पक्षपातो भगवतः ॥ तेनैतत्प्रयत्नंवि
नानैतत्फलसिद्धिरिति ज्ञापितं ॥ ननु एते भगवदनभिप्रेतं कथं कुर्वंतीति चेन्न ।
सत्यं परं तु यत्र भगवद्ज्ञाभिमुख्यस्तत्रैवाचार्याणां कृपा न सर्वत्रेति तत्फलं निरस्तं ।
एतेनैतदभिप्रायेपिनैतत्कृपाव्यतिरेकेणाफलं भवेदेतदर्थमिव प्राकट्यस्या कृल:
नुरोधादिति ज्ञापितं ॥ तदुक्तं वल्लभाष्टके ॥ नाविर्भूयाद्दिति ॥ ननु एतच्छ्रर

णागतेएतत्कृपयाताहृग्भावोदयेनप्रभुराज्ञाधीश्वरवदनदिदृक्षार्त्तिर्जाये
तत्पुनःसाकदाकथंवानरपेतत्राहुः॥स्मृतिमात्रार्त्तिनाशनः॥आचार्याणांभ
क्तविषयिणीयास्मृतिःस्वमनसिप्रभोरप्येवातन्मात्रेणैवसाक्षात्संबंधरूपांतां
नाशयंति॥एतेनैतत्स्मृतिमात्रेणसाक्षात्संबंधरूपंफलंभवत्येवेतिनिःसंदि
ग्धत्वज्ञापनायमात्रपदंदत्तं॥एवंसतिश्चार्त्तिश्चेत्फलेविलंबोनास्तीत्यपिसू
चितंभवति॥ननुशरणागतेपिभावोदयेसतीदंभवेत्इत्युक्तंसएवकेनप्र
कारेणभवेत्जातेवाफलसंबंधपर्यंतंकेनप्रकारेणातिष्ठेद्येनेतरस्यासंगेन
प्रतिबंधोनभवेतत्राहुः॥श्रीभागवतगूढार्थप्रकाशनपरायणः॥साका
रब्रह्मवादैकस्थापकोवेदपारगः॥८॥श्रीभागवतेयेगूढार्थाःपुष्टिप्र

सर्वो०टी० लसंबंधिनोलीलारसभावास्तास्तत्काशनेपरायणास्तदेकनिष्ठाःनिरंतरंस्वीयानामर्थे
तद्भावाबद्धिःकथनेनप्रकाश्यंतइतिभावः।एतेनयेयेभावालीलासंबंधिनोनि
२५ रूपिताःतच्छ्रवणेनतत्कथासमयात्तद्भावोदयःततस्तद्व्यतिरेकेणसर्वत्राऽरुच्याफ
लप्रतिबंधकत्वाऽनामत्वस्फूर्तिःतदानंतत्सर्वत्यागेनफलसंबंधाभावजनितात्तापावि
विधलीलारसभावभावनयातत्तद्भगवद्विशिष्टलीलानुसंधानेननिरंतंतद्विरहानु
भवंकुर्वन्निकेवलस्वरूपात्मकःसंश्लिष्टेत।एवंतिष्ठतःफलप्रतिबंधोनभवेदिति
ज्ञापितं॥किंच॥श्रीभागवतोक्तभावकथनेनैतन्मार्गप्रमाणत्वमप्युक्तं॥न
नुश्यद्यवधिईदृग्गुणविशिष्टंब्रह्मेतिकेनापिननिरूपितं॥यत्रावतारस्वरू कृष्णः
पादिर्हश्यतेतत्रसगुणत्वमेवप्रतिपादितंनतत्कथमीदृशोऽसाधारणब्रह्मेतितस्य २५

फलत्वमपिइत्युच्यतेतत्राह ।। साकारेति ।। ईदृग्गुणविशिष्टमेवसाकारब्रह्मेतिमु
ख्यतयास्थापकः अक्षरंतदधिष्ठानं ।। ननुकेनप्रमाणेनउच्यतेतत्राह ।। वेद
पारगः ।। तादृशंब्रह्मयतोवाचोनिवर्तंते । इतिश्रुत्याश्रुत्यगम्यत्वात्तदंतगतं
नास्तिकिंतुतत्पारंगतमित्यवगम्यते ।। अतःआचार्याअपिवाक्पतिसेनवेदपा
रंगतास्तद्रूपायवेतियादृशंब्रह्मतादृशमेवप्रतिपादितं ।। नहिकस्यचित्स्वस्व
रूपकथनेअन्यप्रमाणादिकमपेक्षितंभवति ।। यद्वा ।। एतएवसमस्तवेदार्थ
पारंगतायतस्तत्रानंदमात्राकारत्वमेवप्रतिपादितमेभिरपितथैवप्रतिपादि
तमितिश्रुतिःप्रमाणमुक्तं ।। अन्येषामेतादृशस्वरूपाज्ञानादेवपारंगतत्वम
पिनास्तीतिसूचितं ।। किंच । यत्रसर्वप्रपंचस्यैवब्रह्मरूपत्वंप्रतिपादितंतत्रमा

सर्वो०टी० स्वात्मरूपोत्तमेपूर्णेब्रह्मणिएकरसेज्ञानंदमात्राकारेकिंवक्तव्यमितिभावोपिसूचि
तः॥ननुप्रपंचस्यब्रह्मत्वंकथमुच्यतेमायिकत्वात्तत्राह॥मायावादनिराकर्त्तास
२५ र्ववादनिरासकृत्॥भक्तिमार्गाब्जमार्त्तंडस्त्रीशूद्राद्युद्धृतिक्षमः॥२४॥मायावादंनि
राकृत्यप्रपंचस्यब्रह्मात्मकत्वंस्थापितंश्रुतिबलेन॥ननुअन्यवादिनएवदूषयेयुस्त
त्राह॥सर्ववादनिरासकृत्॥एतेनवादेनसर्ववादिनांनिरासंकृतास्थापितमि
तिनकस्यापिदूषणावसरःश्रुतिसिद्धत्वात्॥एवंसतिएतन्नाम्नासर्वेषामेव
एतत्स्वरूपाज्ञानंतत्तमतसाधनासाध्यत्वंचोक्तं॥ननुतर्हिकेनमार्गेणज्ञायते
प्राप्यतेचेतितत्राह॥भक्तिमार्गेति॥भक्तिरेवमार्गस्तद्वारासेव्यंपदअंबुजंप्रभु रूह्नः
चरणसरोजंतत्प्रकाशकः॥अनेनमार्गेणज्ञायतेप्राप्यतेचायमर्थोमार्त्तंडः २५

मार्गत्रयोः प्रकाशकः मार्गप्रकाशो मतिलोकात्त्रमसुखमनुभवंति॥ तत्रापि
नकेवलमममस्य किंतु अतिमरसमधुरमिसमीरलीलाचलदमलनवपल्लवतरु
गणेन समंततोरमणीयस्य निजनिजरसभावविवशाविर्हितविविधरतिकेलि
कलहंसीकुलसंगरुचिरस्य पद्मपतयानेत्रोत्सवस्य रसालतया मधुरस्येत
द्दसोद्बोधकस्य पमरोवरोत्तमस्यापि॥ तथा श्रीमदाचार्यप्राकट्येन भक्तिमार्गप्र
काशः तत्रापि नकेवलं किंतु नाद्दशारसरूपस्य माहात्म्यमोः स्वरूपानुभवस्यापि
॥ एवमेव तन्मार्गो भक्तिप्रकाशकनिष्ठया साक्षात्स्वरूपानंदद्वयो भवेदिति भक्ति
मार्गमर्यादा॥ यद्वा॥ भक्तिमार्गरूपमेव पद्मं तत्प्रकाशकः॥ लोके मार्गो भि
न्नः अर्जं भिन्नं॥ अत्र मार्गस्यैवाब्जत्वनिरूपणेन भक्तिरूपचरणमेवाब्जं स्फुवि

सर्वो०टी० तं॥ मार्गपदेन मार्गो यथाज्ञातः सन् गमनेनेष्टप्रापकस्तथेदमपि पुष्टिमार्गस्त्वयं
साक्षात्पुरुषोत्तमप्रापकमिति ज्ञापितं॥ तथैव मार्तंडः प्रकाशकः स्वस्य सकल
२६ मार्गप्रकाशकः यत्र तस्यापि न गतिस्तत्प्रकाशकः अनेन श्रीमदाचार्यरूपस्यैव त
त्सान्निध्येनैवांगीकृतभक्तस्य हृदये तादृशारसरूपनरसारविंदप्रकाशो भव
तीति भावः सूचितः॥ यद्वा॥ भक्तिपदेन स्नेहरूपा उक्ता॥ अत्र पदेन यानि यानि तद्रू
पमेयान्यंगानि सारसशोधकानि। अथवा प्रनोः पश्चापि यानि रसशोधकान्य
वेणितानि सर्वाणि ज्ञेयानि॥ अनेन मार्गद्वारा कोटिकंदर्पलावण्यस्यापरम
मधुरिमनिधानस्य स्वरूपस्य प्रकाशो भवति। तादृशास्नेहासक्त्या हृतः
तन्मयता सर्वत्र भवति नेतरनावगंधतापीति सूचितं॥ यद्यपि तत्प्रकाशो २६

नान्यप्रकारकः। यथा मार्तंडस्तापकस्तथाऽत्र सर्वात्मभावजनितसाक्षात्स्वरूपसं
बंधाभावान्नेतीयेन तापकः। किंच यथा यथा मार्तंडप्रकाशस्तथा तथा तापाधि
क्यं। एवं यथा यथा श्र्याचार्योऽनुग्रहस्तथा तथा तादृशभावात्मकस्तापोऽपि त
त्र यथाऽत्र रसमपातारामधुपास्तयै तादृशांगीकृताः। एतेनान्ये तादृशास्सर्वात्मभा
वेन सर्वविषयान् सवासनांस्त्यक्त्वाय तादृशाचरणारविंदमूलं प्राप्ता यथा मंत्र
ज्ञेति तास्तियेषां साक्षात्स्वरूपरसपानं श्रीकृष्णाधरामृतास्वादसिद्धिर्नान्यथा॥
तादृशास्तु स्वयमेवाऽस्यात्मप्रभुरिति तत्साक्षाद्दृष्टुः सम्येव जातो नान्यस्येति स्वानु
भवरावोभूतसिद्धिजातं भवतीति भावः। एवं सति यदुक्तमाधिकारिणस्ते प्राप्य
मित्युक्तं॥ यमर्नर्घाऽनधिकारिणस्तैः कथं प्राप्यते तेभुतदनुग्रहाभेनवान

सर्वो॰टी॰ चाङ्कः ॥ स्त्रीति ॥ तेषामप्युद्धारे क्षमः समर्थः । अयं भावः । स्त्रीशूद्रादिषु सर्वकर्मानधि
काररूपं निकृष्टत्वं दोषः स च न केनाऽपि दूरीकर्तुं शक्यः । आचार्यैस्तु स्वमार्गांगीका
२७ रेणैव सर्वे दोषा निवर्तिताः । यतः सर्वे ब्रह्मसंबंधकरणानंतरं सकलसाधनैर
प्राप्यसाक्षात्पुरुषोत्तमस्वरूपभजनाधिकारिणो जाताः । तेनैव तेषामुद्धारः ।
एवंप्रकारकोद्धारकृतिसामर्थ्यमाचार्याणामेव नान्येषामिति ज्ञापनाय क्षम
पदमुक्तं ॥ किंच ॥ येषां साधारणधर्मेष्वप्यनधिकारस्तेषां सर्वाधिकपरमफल
रूपसाक्षात्पुष्टिमार्गीयश्रीपुरुषोत्तमभजनाधिकारः स्वीकृतिमात्रेणैव
संपादितः किमतोऽधिकमाचार्याणां सामर्थ्यं वक्तव्यं ॥ किंच ॥ अत्र उद्धारपदे कमः
नेदमपि ज्ञाप्यते ॥ यद्वा ॥ महांधकूपे पतितस्य कस्यचिद्रज्वादिकमवलंब २७

दत्वाकिंनविद्धारःक्रियतेदयालुनातथाप्येतेसर्वधर्मानधिकारित्वेनसहज
दोषेणभवसंसारमहांधकूपेपतिताःअतस्तेषांस्वकृपाकटाक्षरूपरंपरारज्ज्व
वलंबंदत्वोद्धारःकृतइतिभावःसूचितः।एतेनयथामहांधकूपपतितस्यजीव
नंकाष्ठावलंबंभवतियदिभवेत्तदपिमृतकप्रायंतथात्रनेतिसूचितं।।अत्रतु
करुणारसाकृतकटाक्षामृतपूरदृष्टिभिःतेषांबाह्याभ्यंतरपूरितानांतदा
त्मकमेवसर्वंदेहादिकंभवतीत्यलौकिकसामर्थ्यमाचार्याणांद्योतितं।।ननुआ
चार्यस्यतादृशसामर्थ्यंमुक्ताएवपरंप्रभुश्चेन्नस्वीकरोतितदाकथंतत्राह
।।अंगीकृत्यैवगोपीशवल्लभीकृतमानवः।।अंगीकृतौसमर्यादोमहाकारुणि
कोविभुः।।१०।।अंगीकारमात्रेणैवगोपीशप्रेष्ठीकृतामानवायेन।।अनेन

सर्वोन्द्रीप प्रभोः परमप्रेमास्पदत्वाय एव जाताः॥ स्वीकारे किं वक्तव्यं॥ किंच॥ अत्र गोपीत्वाय देहेन ली

लारससंवलितं भक्तसाहित्यमुक्तं॥ तेन तल्लीलारसभावजनितपरमप्रेमास्पदीभू

१८ ताऽप्यपि ज्ञापितं॥ तेनास्मिन्मार्गे स्वामिन्य एव गुरव इति तद्रूपाव्यतिरेकेणैवैत

द्रसप्राप्तिरिति तत्प्रेमास्पदत्वेन सर्वथा तद्रसप्राप्तिर्भवतीति सूचितं॥ अन्यथा

ताद्दृशप्रियासहितलीलायां प्रभोरन्यत्र प्रेमास्पदत्वमशक्यं॥ तत्प्रेमास्पदत्वे।

च प्रभोरपि वश्यत्वमङ्गीकृताऽइति भावः॥ एतेन लीलासरूपाणां तासां प्रभोरप्याचा

र्यस्वरूपाधीनत्वं सूचितं॥ तेन यथा यथाचार्यानुरोधनं कृतायां लीलायां महा

न् रसः प्रभोरुत्पद्यते तथा नान्यत्रेत्यपि सूचितं॥ अन्यथा उभयोरन्यत्र प्रेमा कल्ल:

स्पदत्वेन नैव दास्याचार्या अपि एवमनुरोधं न कुर्युरिति भावः॥ एवं सति मह १८

र्थेश्रीमदाचार्याःप्रभोक्तासांवलीजायांतादृशमनुरोधंकुर्युःप्रभुरपितादृशतद
नुरोधेनतत्रप्रमास्पदत्वंकुर्यात्तादृशाःश्रीमदस्मत्सन्मुव्यतिरेकेणान्यःकोपि
नास्त्येवेतिसानुभवएवप्रभुरोक्तइतिमदाशयःसंपद्यते॥एतेनकेवलाङ्गी
कारमात्रेणैवयत्रेतादृशाःफलंभवतितत्राकारकृतेकिमुवाच्यं॥ननुसर्वे
षामेवफलंभवतिकिंतुवातारतम्येनतत्राह॥अंगीकृतावितिं॥तस्यांसत्यां
मर्यादासहितः।तत्करणेतारतम्यंनकिंतुरसदानेतारतम्यंरसदानंतुतत्
भावानुरूपमेवभवतीति॥अंगीकृतेतारतम्यंत्वेतन्हितन्मात्रेणैवमानवाभ
गवतःप्रमाप्पदानमेवयुर्भगवान्चातेषां॥पूर्वश्लोकेअंगीकृतेप्वेवेत्येवकार
श्च्यर्थःस्यात्।तेनैवतावन्मात्रमेवतारतम्यंफलंतुतदेवेतिभावः॥अथ

सर्वोष्टी० वासर्वेषु ईदृक्प्रकारकांगीकृतोमर्यादासहितएववस्तुनिर्मर्यादः।यमंगीकरोतिसतु नि॰
तन्मात्रेणैवतत्प्रियोभवतिपरंतुसर्वत्रतादृशांतःकरणएवतत्सहितःप्रमाणत्वे
१८५ नैवकुरुतइत्यर्थः।तेनैकवारमेवसर्वेभ्यस्तादृक्फलंनददातिक्रमेणदास्यती
तिसूचितंभवति॥ननुएतादृशंफलंसर्वेभ्यएवकथंदास्यतितत्राहुः।महाकारु
णिकइति॥सर्वेषांदुःखलेशगंधस्याप्यसहिष्णुत्वेनकरुणायुक्तःसतत्फलंद
दाति॥अयोग्यानामपिब्रह्मादिदुर्लभकथदानेनअसाधारणकरुणावत्त्वमस्ती
तिज्ञापनायमहत्पदंकरुणायामुक्तं॥ननुअयोग्येष्वपिदानेकिंसामर्थ्यंतत्राहु
ःविभुरिति॥सर्वकरणसमर्थःअयोग्येष्वपियोग्यतांसंपाद्यदातुंसमर्थः।ननु कृष्ण:
जीवाअयोग्याःफलंतेषुअदेयंतत्केनप्रकारेणददातितत्राहुः॥अदेयद १८५

नहस्तस्यमहोदारचरित्रवान्॥ प्राकृतानुकृतिव्याजमोहितासुरमानुषः॥१४॥
अदृश्यं सर्वथा नैवेनापि हानुंशकां स्वतंत्रमित्यर्थः। तदा नेहस्तेति चतुरः। अयं
भावः। अत्र अदृश्यं फलं साक्षात्संबंधरूपं तत्स्वरूपं तु महारससंनिधानं
ताहृशस्य संबंधकरणं सर्वात्मभावप्रपत्त्यैव भवेन्नत्वन्यथेति ईहशरूपं योग्य
तां तेषु संपाद्यते तत्स्वतंत्रस्यापि हानेः। तिचतुरः। तत्त्वातुर्यं यथा नक्तस्पर्शेनाधि
कोनाश्रुक्ताग्रातस्तत्ताव विशेषाउत्पद्यंते तथा स्वतंत्रस्यापि भ्रमोत्तारिन्नासक्ता
स्मिन्नाधिकेन तत्संगाभिलाषजनित भाव विशेषाउत्पन्ना भवेयुस्तथा कृ
तिरेव॥ ईहशं तु महद्दलौकिकसामर्थ्यमाचार्याः स्पष्टयंति॥ एतज्ज्ञापनार्थ
भवदरूपद मुक्तं॥ एवं सत्येताहशस्य चातुर्यं भाना भावमस्तीति दानमप्यश

सर्वण्टी० कांतेषामित्युक्तं॥ यद्वा॥ अदेयदाने ऽतिचतुरः। अतिप्रवीणः सावधानः प्रमादर
हितः यथा सांतर्गृहदानं वी सावधानतयास्वहस्तेनान्यस्मै ददाति॥ तथा यत्सोप
२० भुक्तं स्वस्य फलं तत्स्वहस्तेनान्यस्मै ददातीति भावः। तर्हि अन्यैर्देयं तन्नमनि
ष्यतीति न वाच्यं॥ यत एतत्फलमाचार्याणामेवं नान्येषां॥ नहि कस्यविद्याद्यमपि
धनं स्वतरेणाकेनचिद्दातुं शक्यं॥ एतेन सोपभुक्तं स्वस्य फलं स्वयापयत्येवमन्य
स्मै ददातीत्युक्तं भवति॥ अग्रेपि कृपयेतत्कथाप्रदः निगूढहृदयः गुप्तिलीलाक
तरिहः प्रियः सर्वज्ञातलीलः अतिमोहनशत्वादिभिस्तथैव वक्ष्यंति॥ ननु ए
वं चेत्कस्मैचिदपि तत्फलं ददातीति न वा तत्राह॥ महोदारेति॥ कदाचिद्देवदा फलः
तुमिच्छेत्तदा दातृत्वं फलाकांक्षापूर्वकपात्रापात्रविवेकेन दानं तद्रहितेन २०

दानमौदार्यं॥तत्रापिस्वसर्वस्वनिधिदानंमौदार्यं॥एवंमहौदार्यंस्वमनसिकृत्वा।
तादृशायपरमप्रेमास्पदायतत्सर्वस्वनिधिदानंकरोती।तिपरमदुर्लभत्वंतत्फल
स्यसूचितं॥एतादृशास्तुअस्मत्प्रभुरेवनान्यएवैतादृशंफलंदत्तमितिस्वानु
भूतत्वेनमहोदारत्वमुक्तं॥नन्वेवंसत्याचार्याणामप्यलौकिकस्वरूपत्वेलौ
किकेष्वप्राकट्येनतत्साधारणानुकरणंनघटतेतत्राहुः॥प्राकृतेति॥इदं
तुआसुरमोहार्थंअनुकरणव्याजमात्रमेवस्वरूपंतुतादृशालौकिकमेव॥
किंवानुकरणेपिदैवानांतत्रापिविज्ञायतेभक्तानांतादृशमेवानुभूतंभ
वतितैस्तथैवदृश्यतेऽनुभूयतेच॥तेनासुराणांसर्वदामोहएव॥मोहस्तु
तमोरूपमेवतेनतेषांतत्रनप्रकाशः॥दैवानांतुयथायथारूपातिशयः

मर्वोष्टीय तद्यानयातत्स्वरूपज्ञानानुभवश्चेति भक्तानां प्रकाशाय एवेति सूचितं ॥ ननु श्री
चार्यस्वरूपेंधकारनिवृत्तिपूर्वकप्रकाशको धर्मः कथं निरूप्यते तत्राह ॥ वैश्वा
२१ नरो वल्लभाख्यः सद्रूपो हितः तत्सतां ॥ जनविमोहाकृतेरुल्लभक्तिरुनिगदलेष
दः ॥ २२ ॥ वैश्वानरत्वेन साक्षात्पुरुषोत्तमस्वरूपविंदाधिष्ठानत्वं अलौकिकाग्नि
रूपानिरूपित तस्तेनांधकारनिवृत्तिपूर्वकप्रकाशकधर्मवत्वं निरूपितं ॥ ननु
हि श्रीमत्सुरेषु मोमोहांधकारव्यापकत्वं दैवेषु तदभावपूर्वकज्ञानप्रकाशक
त्वं घटते न त्वग्निः प्रकटितः एकं प्रकाशयति अन्यं नेति तत्राह ॥ वल्लभाख्य
इति ॥ सर्वेषां भक्तानां प्रियरूपः ॥ एवं सति भक्तानां प्रियरूपत्वेन ज्ञानप्रका कृत्स्नः
शकत्वमेव हेतुः ॥ नो चेत्तदभावेन यदि नैव तदासुराणामपि प्रियरूपः ॥ २२

भवेत्॥ तदभावात्तदेवहेतुः प्रियरूपत्वे तज्जन्यज्ञानप्रकाशस्तु भक्ताधारप्रि
यत्वहेतुक एव॥ यथा यथा भक्ताधारप्रियत्वं तथा तथा तत्स्वरूपज्ञानप्रका
शः तथा तथैव च भक्तानां प्रियरूपा अपि भवंति॥ लोके पि यो यस्य प्रियरूपः
सतस्य प्रियत्वव्यतिरेकेण न भवति तेन भक्तानां स्वप्रियत्वाधिक्येनैव प्रियरू
पत्वमाचार्यो गांसंपन्नं॥ यथा यथा भक्ते स्नेहातिशयस्तथा तथा आचार्यो
अपि स्वस्मिन् प्रियरूपत्वं अंगीकुर्वंति॥ ति भक्तानां स्नेहेनैव प्रकाशः तेषां
तु तदभावान्न भवतीति भावः॥ एवमासुरेषु अंधकारस्थापनेन भक्तेषु प्रका
शाकत्वेन आचार्येणमाछादितास्वरूपत्वं सिद्धं॥ तेन यथा भस्माच्छन्नम
ग्निं वेदिंधनेन संधुक्षणं कृत्वा प्रकटयति तद्वा प्रकाशो भवेत्तद्ज्ञानेन

भवेत्॥ तद्भावात्तद्वद्धेतुः प्रियरूपत्वे तच्छक्तज्ञानप्रकाशस्तु भक्ताधारप्रि
यत्वहेतुक एव॥ यथा यथा भक्ताधारप्रियत्वं तथा तथा तत्स्वरूपज्ञानप्रका
शः तथा तथैव च भक्तानां प्रियरूपा अपि भवंति॥ लोके पियो यस्य प्रियरूपः
स तस्य प्रियत्वव्यतिरेकेण न भवति तेन भक्तानां स्वप्रियत्वाधिक्येनैव प्रियरू
पत्वमाचार्याणां संपन्नं॥ यथा यथा भक्ते स्नेहातिशयस्तथा तथा आचार्या
अपि स्वस्मिन्प्रियरूपत्वं अंगीकुर्वंतीति भक्तानां स्नेहेनैव प्रकाशः तेषां
तु तद्भावान्न भवतीति भावः॥ एवमासुरे घंधकारस्थापनेन भक्तेष्वप्रका
शकत्वेन आचार्येणाच्छादितानामग्निरूपत्वं सिद्धं॥ तेन यथा भस्माच्छन्नम
ग्निं वह्नींधनेन संधुक्षणं कृत्वा प्रकटयति तद्वत्प्रकाशो भवेत्तद्ज्ञानेन

प्रकाशाख्यैवेतिलौकिकाग्निरीतिः।अयंतुलौकिकाग्निःसचसर्वत्रतेनज्ञातस्य
त्तदालौकिकस्नेहरूपेंधनेनालौकिकप्रकाशरूपोनभवति।।तत्रबाह्याभ्यंतर
२२ प्रकाशरूपसत्वात्प्रहृदयएवअग्नेरित्याद्यलौकिकत्वमुक्तं।।तेनपार्श्वस्थि
तत्वेपिआसुराणांमोहात्तुज्ञानमेवनास्तिकदाचिदितिमदाद्युदयाऽइतिभा
धारणाज्ञानेपिस्नेहेनविनानतेषांप्रकाशः।किंतुमोहएवेतिसर्वमवदा
तं।।यद्वा।।वह्निर्नास्त्वइतिनाम्नावैश्वानरोपिस्नेहरूपत्वेनभक्तानांहृद
दीपइवप्रकाशकश्चाह्लादकश्चआसुराणांतुकेवलाग्निरूपत्वेनतापक
एवनतुप्रकाशकइतिमोहांधकारस्यापकत्वंयुक्तमेवेतिभावः।ननुए कस्य:
वंपूर्वोक्तिप्रकारेणभक्तानांप्रकाशकोभवतुपरंतुतेषांस्नेहस्तुनवद २२

शायां तत्तेजोपि न्यून एव भविष्यति यथैवं घनेगते ऽग्निप्रकाशास्तथेति शंकानि
राशायाह ॥ सद्रूपइति ॥ सदानंदस्वरूपस्तेन स्वयमपि तादृक्स्तद्रूपत्वेन
सर्वदा स्वतःप्रकाशात्मकसच्चिदानंदरूपः ॥ तदा लौकिकेषु दुष्टेषु कथं प्रक
टस्तत्राह ॥ स्थितरुद्दिति ॥ साधूनां स्वीयानामर्थे प्रकटः अन्यथा तेष्वासुर
पंगताद्दुष्टा एव भवेयुरिति ॥ ननु तेषां हितं केन प्रकारेण करोतीति तत्रा
ह ॥ जनेति ॥ निजजनानां शिक्षार्थं कृष्णभक्तिं करोति ॥ स्वयं करणेन स्वमा
र्गभजनप्रकारः स्वज्ञापित एव ज्ञातो भवति नान्यथेत्युक्तं ॥ अनेनान्येषामज्ञा
नमप्युक्तमेव ॥ एवमेतत्त्व शिक्षितप्रकारेण साक्षात्फलरूपश्रीकृष्णभज
नेन तादृशोस्मिंदेजातस्ततः साक्षात्स्वरूपप्रकाशेन भक्तजनानां हितं इ

सर्वो०टी० ष्टं भवतीति भावः॥ ननु तत्किमिष्टमित्यपेक्षायामाह॥ निखिलेति॥ यस्य यस्य यथा म
नोरथः यथा भावना तस्य तथैव निखिलमिष्टं ददाति॥ एतेन पुष्टिफलरूपभ
२३ जनेन साक्षात्स्वरूपसंबंधिना मनोरथास्तत्तद्भावभेदेन पृथक् पृथक् उक्तस्तद्यं
तेन भक्तानां तान् सर्वान् ददातीति सूचितं॥ ननु अत्र भजनं श्रीकृष्णस्योक्तं फ
लदातृत्वमाचार्याणामुच्यते तत्कथमुपपद्यत इति चेत्सत्यं॥ परं त्वेतत्पुष्टि
मार्गस्याधिष्ठातृत्वमेतेषामेवाप्सितफलभोगार्थं भगवतैव प्रकटितत्वात्॥
अतएतदधीनत्वेनैव फलं भगवान् ददाति नान्यथेत्येतदुक्तमेव फलं प्राप्यत
इत्येतेषामेव दातृत्वमायातमिति सुष्ठूक्तं निखिलेष्टद इति॥ किंचापूर्वनाम्नि कृष्णः
कृष्णभक्तिकृदित्युक्ते लेकस्यानिवृत्तिर्मुखस्याचार्यस्वरूपे तद्भिन्नत्वशंकास्या २३

त्तदेतन्नाम्ना निराकृता ॥ नहि भजनीयोऽन्यस्तत्फलदातेतरो भवति किं लोक
एव एतन्नाम्ना यत्फलमेव स्फुटीकृतमिति सर्वमनवद्यं ॥ ननु निखिलेष्टदत्वं
कथं ज्ञायते तत्राह ॥ सर्वलक्षणसंपन्नः श्रीकृष्णज्ञानदो गुरुः ॥ स्वानंदतुं
दिलः पद्मदलायतविलोचनः ॥ सर्वलक्षणानि श्रीहरेर्यद्वा नाडीनिमदो दा
र्यादीनि तानि तानि प्रकटान्येव हस्तपत्र इति तज्ज्ञानं भवतीति भावः ॥ ननु ए
तत्स्वरूपज्ञानेन न फलं प्राप्यते परं तु फलज्ञानं विना तस्यास्वादे रसस्तादृशो
न भवेत्तत्राह ॥ श्रीकृष्णज्ञानद इति ॥ यादृशं फलं यादृशस्तत्परसस्त
ज्ञानं ददातीति भावः ॥ ननु सदुपदेशं विना तज्ज्ञानमपि स्वस्वपरिणामि
न भवति तत्राह ॥ गुरुरिति ॥ एतज्ज्ञाने एते एव गुरवो नान्ये सर्वाज्ञानात् ॥

सर्वो०टी० तेनसर्वदैवसुखरूपमित्युक्तं।ननुभवेभोग्यथेच्छांस्वसर्वस्वसमर्पणेच्छादानेनक
दाचिन्मनसिश्रवणतापेनखेदोम्लानतावाभवेत्तत्राह।स्वानंदतुंदिलइति॥
२५ सर्वदातेनैवपूर्णइत्यर्थः।पूर्णत्वेनैवखेदाद्यभावःसूचितः।यद्वा।स्वानंदेन
सुतरामानंदेननतुंदिलः।बाह्यांतरंपूर्णः।द्विगुणीकृतइत्यर्थः।एतेनपूर्व
सद्रूपत्वेनसदानंदस्वरूपत्वंपूर्णत्वंचोक्तमेवपश्चात्तादृशाभक्तेस्वसर्वस्वरू
पदानेकृतेतस्यस्वीकृतत्वेनपरमप्रसन्नतयातत्रश्रीमत्प्रभावप्रियसदानंदक्र
र्वतिसतितल्लीलारसानुभवजनितानिर्वचनीयनवीनानंदभरेणातितुंदिलः।
पूर्णोप्यतिपूर्णइतिकृतस्तुरांखेदादिसंभावनाप्रस्तुताऽधिकंतत्रानुप्रविष्ट कृष्णः
मिति॥अतएवतज्ज्ञापनार्थमेवस्वरूपमार्गस्त्तुंदिलपदंचोक्तं॥ननुकथंज्ञायते २५

तेनपूर्णास्तत्राहुः।पद्मेति॥पद्मदलवद्दीर्घ्यंते विशिष्टे ईक्षणे यस्य।लोचने वि
शेषस्तस्यैवेक्षितानंदधर्मविशिष्टत्वमेव॥यद्यप्यंतर्गृहस्थयापि तादृशलीलानु
रसानुभवात्तादृशात्तद्भावरसाकृतरससंवलितदृष्टिविक्षेपादिना तद्दी
क्षणे प्रकट एव दृश्यते॥अत एव पद्मदृष्टांत उक्तः।यथा पद्मे सरसत्वानु
रागादितापहारकत्वाप्यायकत्वादिधर्मो दृश्यस्तथैव तद्विलोचनयोरप्येते ध
र्माः प्रकटा एव।यथा तत्स्पर्शसहजास्तथा एतयोरपि॥एतेनैतादृशस्वरूपत्व
मेव तयोः सर्वदा नान्यथा कदाचिदपीति ज्ञापितं॥ननु एतद्विलोचनयोरे
ते पद्मोक्तधर्माः संतीति कथं ज्ञायते तत्राहुः॥कृपादृग्वृष्टिसंहृष्टदासदासी
प्रियः पतिः॥रोषदृक्पातसंप्लुष्टभक्तविड्भक्तसेवितः॥४॥कृपादृष्टिनां

सर्वो०टी० हृदय:अनवरतरसासाराद्रीकृतकटाक्षविक्षेपाक्षै:सम्पर्कहृद्यतानाद्यास्वरूपरसानु
भवजनितबाह्याभ्यंतरपरमानंदरसपूर्णा:हासाहासाक्षातासांप्रिय:अतस्तंतंप्रिय
२५ रूप:॥एतेनैतद्रसपूर्णत्वंयदृशानामेवनान्येषामितिसूचितं॥किंचयथापूर्वंग्री
ष्मजनितसंतापतप्ताबर्षागमाद्रागमात्रजीवना:पश्चात्सुघननवीनघनरचितमहावृ
ष्टिभिर्निर्वर्तितसंतापा:बाह्याभ्यंतरशीतलीकृता:अतएवेंद्रियप्राप्याप्यायिताजनाभवं
ति॥यथापूर्वंश्रीमदाचार्यस्वरूपानवरतभावनाजाततादृशात्मभावेनसाक्षा
त्प्रभुसंबंधार्तिजनितप्रचुरतापसंतप्तास्तत्संबंधाशामात्रधृतजीवना:पश्चात्कृपा
दृष्टिरूपामृतवृष्टिभिस्तत्साक्षात्संबंधेननिवर्तिततापा:बाह्याभ्यंतरशीतलीकृता कृष्ण:
:परमानंदभरेणसर्वेंद्रियाप्यायिताभवंतीति॥इदमेवसम्पर्कहृद्यत्वं॥पूर्वम २५

पि सर्वदा तत्स्वरूपादृष्ट्या हर्षयुक्ता एव परंतु तद्दानसम्पर्कत्वं तापात्मकत्वात् । पश्चा
त्तत्संबंधजातसम्पर्कहर्षयुक्ता भवंति । एवं भक्तिदासीनां प्रिय एव भवति प्रियो
ऽप्यसाधारणः ताश्चार्पितपां प्रिया भवंतीत्युचितमेवास्य तत्तत्संबंधेन प्रभोरपि
सुखाधायिका जाता इति भावः । ननु दासीनां प्रियत्वेन लोकदृष्ट्या प्रभुत्वहीन
त्वमायातीति चेत्तत्राह । पतिरिति । शरणागतप्रतिपालकः । तत्राप्ययमलौकि
कः । एतेन ये संसाराद्भीताः अशरणशरणमेनं प्राप्तास्तान्दासत्वेनांगीकृत्य पर
त्वतियतः शरणागतपालनश्रीजः सर्वदैवास्यं । एतेन प्रभुत्वेन काचिद्धीनता प्र
त्युताधिकं तत्रानुप्रविष्टमिति न्यायेन प्रभुत्वशोभा ॥ सर्वप्रभुः यो दीनशर
णं कृपया प्रियत्वं कृत्वा रक्षति ॥ ननु येष्वाभयमुत्थितं ते चेद्भक्तिनस्तदा कथमे

तिरस्कर्तुं समर्थास्तत्राहुः॥ रोषेति॥ एतेन भक्तद्वेष्टारं तु कटाक्षमात्रेणैव सम्यक्
पुष्टा जाताः सम्यक्दाहेन भस्मीभूता एव॥ ननु तादृशे क्रोधे समुत्पन्ने तस्य शांतिः



कथं भवतीति तत्राहुः॥ भक्तसेवितइति॥ भक्तैर्निरंतरं सेवितः एतेन भक्तद्वेष्टरि दृष्टे
क्रोधस्तेन तस्य तद्दैव नाशो भवति भक्तदृष्टे भवति शांतिः तत्स्तुत्या हि ना वा॥ ननु कदा
चिद्भक्तेष्वपि क्रोधो भवेत्तत्राहुः॥ सुखसेव्यो दुराराध्यो दुर्लभांघ्रिसरोरुहः॥
उग्रप्रतापो वाक्सीधुपूरिताशेषसेवकः॥ ५॥ सुखसेव्यः सर्वदा सुखरूपस्य सम
वाप्तिर्न तु कदाचित्क्रोधरूपापि भक्तानां॥ अन्यथा क्रोधस्य दुःखदत्वेन सुखसम
वाप्तत्वं न स्यात्॥ एतेनायं तु तत्सुखार्थमेव प्रकटः भक्ता अपि निरंतरमेतत्सेवया त
त्स्वरूपानंदरसरूपा एव तिष्ठंतीति सूचितं॥ तेन यथा जलसंबंधेनाग्निशांति

स्तथैतादृशानक्तसंबंधेनक्रोधाग्निशांतिर्मुक्तिर्वेतिमुद्दष्टकंनामद्वयं॥ननुतर्हिभ
क्तद्विष्टतिरिक्ताःसर्वेप्यपिकथंनसेवंतेतत्राह॥भक्तैराराध्याः॥सर्वेषामित्यर्थः॥अन्येतु
पासनादिरूपाराधनयातत्तद्देवतानजनंमनसाकुर्वंतीतिसेवाधर्मस्ययोगिनाम
प्यगम्यत्वात्तत्प्राप्यफलस्यापिश्रज्ञानांतेषांतादृशाराधनयादुःप्राप्यएवेतिज्ञा
पितं॥यद्वा॥दुःखेनचाराध्याःभक्तानामपिसेवाप्रवीणानामपिमहद्दुःखेनारा
धयितुंसाधयितुंस्ववशांकर्तुंसिद्धिरूपंवाकर्तुंयोग्याः॥कुतस्तत्रामज्ञातत्सेवामा
र्गविधानामन्येषांसेव्यत्वसंभावनापरंमहापुरुषज्ञानेनकदाचिद्दर्शनेनमना
द्विष्यवहारःसंभवतीतिसूचितं॥ननुपूर्वंसुखसेव्यत्वमुक्तंपश्चाद्दुःखेनसा
ध्यत्वमुक्तंचेत॥नक्तेपुदुःखकथनेनभ्रमोरापिक्लिष्टकर्मत्वमायातीतिचे

सर्वोंटी० तत्राहुः ॥ दुर्लभमिति ॥ दुर्लभः दुःखेन लभः लाभो ययोः एतादृशेऽंघ्रिसरोरुहे य
स्यास्तीति दुर्लभलाभ ॥ अंघ्रिसरोरुहयोर्दुःखेन लभ्यत्वोक्त्या सरोरुहपदेन रस
२७ रूपत्वोक्त्या च तद्दुःखं सर्वात्मभावजनिततापरूपमलौकिकमिति ज्ञापितं भव
ति ॥ तेन फलोपयोगित्वात्तत्सुखरूपमेव न लौकिकदुःखरूपं ॥ एतेन प्रभोर
पि श्लिष्टकर्मत्वं संपन्नं ॥ एवं सति तद्दुःखेन चरणारविंदयोः साक्षात्संबंधेन
हृदयस्थापनेन तन्निवृत्तिर्भवतीति स्वदार्यः ॥ ननु तत्तापदुःखनिवृत्त्यर्थमन्यानि
शीतलानुपायरूपौषधानि सत्का चरणारविंदस्थापनं किमर्थं क्रियते ॥ नहि
तावत्पर्यंतं तापनिवर्तकमौषधं चरणस्थापनं न कृतमिति तत्राहुः ॥ उरस्य कुचः
तापः ॥ उरः सकलशीतलवस्तुमात्रानपनोद्यः प्रकृष्टः प्रवृत्ततैः प्रवृद्धः ता २७

पोयस्यभक्तेरूपस्तापःश्रीआचार्यस्वरूपसान्निध्यादेवजातःस्वतोऽन्यानपनोद्यःतच्च
रणसंबंधादेवगच्छतिअन्यथानेति॥तादृशतापस्यसत्कृतत्वादेवदृश्यमानचरणस
रोरुहंतत्रस्थाप्यतेचरणसरोरुहंतुमहदारमनिधानमितितेनतापनिवृत्तिरुच्य
तेव॥ननुएतादृशोऽयंप्रतापःसतिकथंतत्सान्निध्येसेवांकुर्वंतितत्राहुः॥चामि
नि॥वचनामृतेनस्फुरिताःस्फुरीकृताश्चयेभावाःसेवकायेन॥एतेनश्रीमदाचार्य
सान्निध्यजनितप्रचुरतापतस्यसुखमेवकांतःकरणेसुतद्वचनामृतसेकेनजीवा
सहितश्रीगोकुलजनजीवनश्रीबालकस्यसतितत्तापनिवृत्तिर्भवतीतिसेवामपिकु
र्वंतीतिसर्वमनवद्यं॥श्रीधुपदेनतद्दानंदरसमस्ताएवमहानितिछंतीतिसूचितं॥
ननुतानिवचनामृतानिकीदृशानितत्राहुः॥श्रीभागवतपीयूषसमुद्रमथन

क्रमः॥ तत्सारभूतरामस्त्रीभावप्रचुरितविग्रहः॥२६॥ अत्रक्रमशतिपदेनमहत्सा
मर्थ्यंद्योतितं॥ पूर्वंतुदेवासुरैर्मिलित्वासर्वैरेवतत्रापिमहताकष्टेनमथनंकृतं॥
२८ अधुनात्राचार्यैरेकस्वरूपेणैवकृतमितिमहदलौकिकसामर्थ्यंसूचितं॥ एवं
मतिर्यथामथ्येनबिंदवउच्छलंतितथैतन्मथनेनकानिचिद्बिंदुरूपाणिवचनामृ
तान्युच्छलितानितत्रैकेनैवबिंदुरूपेणवचनामृतेनअग्रेशोषाःसेवकाःपूरिताः
तत्रएकस्मिन्नेवमग्नाजाताः॥ अतएवकृत्वाद्भुतमपि॥ तरंगोल्लसिसमोद्वेश्युयं
वाध्यायीरसाब्धिषु॥ पुनरुत्थानरहितंविंदोयत्रनिमज्जनमिति॥ तेनवचना
मृतस्वरूपमत्यलौकिकमुक्तं॥ एतेनयस्याविंदोरेवंरूपत्वंतस्यसारभूतानांस्वरू कल्पः
पंकिमुवक्तव्यमितिज्ञापितं॥ ननुभक्तास्तुएकेनैवबिंदुनामग्नाःकृताःपरंतुत

डत्यसारभूतानिरत्नानिकीदृशानिकुत्रचोपभुक्तानित्याकांक्षः॥तत्सारेति॥तत्सार
भूता:रासस्थीभावा:तएवरत्नरूपा:तै:स्वयंहरिर्निविग्रहोजात:॥तानिरत्नानिचान्य
योग्यत्वात्स्वस्मिन्नेवप्रसाधितानितेनतद्रत्नैरेवबाह्याभ्यंतरशोभाविग्रहस्यात्का
भवतिनान्यैः॥एवंसतिएतद्रत्नधारणेएतेषामेवयोग्यतानान्येषामितिसूचितं॥
तेनैतद्रत्नरूपानिर्वचनीया:त्वलौकिकपरमशोभयायादृशमाचार्याणांस्वरूपम
स्तितादृशास्वरूपानुभवस्तुमाहात्म्यश्रीमदस्मत्प्रभूणामेवनान्येषां॥तैरेतद्रसपर
परवशत्वेनैतादृशानामोक्षमितिभावोज्ञापित:॥ननुकथंज्ञायतएतद्भावैरेवभूरि
तस्त्वाकांक्षः॥सान्निध्यमात्रेणश्रीकृष्णप्रेमाविमुक्तिदः॥रासलीलैकतात्पर्यः कृ
पयैतत्कथाप्रदः॥२७॥यतस्तेभावाःप्रेमात्मकाःअतोलीलामध्यतिमहानंदस्था।

